# न्यायदिशा प्रामाण्यवादविवेचनम्

तुलसीपौडेलः

उपप्राध्यापकः

न्यायदर्शनविभागः

पिण्डेश्वरविद्यापीठम्

धरान-नेपालः

*jeeyarsanskritgurukulam1992@gmail.com*

Interpretation of Authenticim in Reference to Jurisprudence
- by Tulasi Poudel

The article attempts to interpret authenticism in reference to Eastern Philosophy of Jurisprudence.

## लेखसारः

*प्रायः सर्वत्र प्राच्यदर्शनेषु प्रामाण्यवादो निरूपितो वर्तते । प्रामाण्यवादस्य सम्बन्धो ज्ञानविषये विद्यते । न्यायवैशेषिकाचार्यैः प्राचीनैः प्रमाणस्य याथार्थ्यार्थं प्रामाण्यशब्दो प्रयुज्यते । तदर्थमेव नवीनैश्च नैयायिकैः प्रमात्वशब्दः प्रयुज्यते । समस्तेषु पौरस्त्यदर्शनसम्प्रदायेषु प्रमाणप्रामाण्यविषये ऽप्रामाण्यविषयेऽपि मतैक्यं नास्त्येव । न्यायमतानुसारेण विशेषतो न्यायमञ्जरीतर्कभाषादिग्रन्थोक्तदिशा प्रामाण्यं प्रतिपाद्यते । अत्रैव प्रामाण्यवादनिरूपणप्रसङ्गे दर्शनान्तरे प्रतिपादितप्रामाण्यं न्यायमतानुसारेण खण्ड्यते च । प्रामाण्यं बहुधा बहुषु स्थलेषु तात्कालिकप्रसिद्धाचार्यैर्निरूपितमस्ति । तात्कालिकविदुषां पदमाश्रित्य प्रामाण्यस्य लघुसमीक्षात्र विहिता वर्तते ।*

**शब्दकुञ्जिका** : अप्रामाण्यम्, परतः प्रामाण्यम्, प्रामाण्यम्, याथार्थ्यार्थ्यम्, स्वतः प्रामाण्यम् ।

## विषयपरिचयः

प्रमाणस्वरूपं विविच्य प्रामाण्यस्वरूपविवेचनं न्यायवैशेषिकदर्शने क्रियते । प्रमाणविवेचनञ्च न्यायशास्त्रस्य महत्त्वपूर्णमङ्गम् । तेनैव महता कार्येणैव दार्शनिका न्यायवैशेषिकान् प्रामाणिका इति नाम्ना सम्बोधयन्ति । तादृशं सम्बोधनं न्यायवैशेषिकदर्शनेन प्रमाणप्रामाण्ययोर्विवेचनाल्लब्धमिति वक्तुं

शक्यते । न्यायसूत्रकारेण गौतमेन न्यायसूत्रारम्भे प्राधान्येनोक्तं- प्रमाणप्रमेयादीनां षोडशपदार्थानां याथार्थ्यज्ञानान्निःश्रेयासाधिगमो भवति । तच्च पदार्थानां याथार्थ्यज्ञानेन हि निःश्रेयसं मिलतीति न्यायसूत्रकारस्य मतमस्ति । उद्देशलक्षणपरीक्षा इति न्यायशास्त्रस्य त्रिविधाः प्रवृत्तयः । इमाः प्रवृत्तीरनुश्रृत्य दर्शनेऽस्मिन् प्रमाणप्रमेयादयः पदार्था निरूपिता दृश्यन्ते । प्रमाणस्य निरूपणानन्तरं प्रामाण्यस्यापि निरूपणं सुयुक्तं भवतीति । अस्य विवेचनं दर्शनजगतो मुख्यो विषयोऽस्ति । दर्शनशास्त्रोक्तानां कतिपयविषयाणां विकासः खण्डनमण्डनधारयाग्रे प्रसारितः । प्रामाण्यस्य परीक्षाप्यनया पद्धत्या वा विकसिता । न्यायदर्शनस्य बौद्धादिभिर्दर्शनान्तरैस्सह विविधेषु विषयेषु सङ्घर्षोऽभवत् । तत्र क्रमे बौद्धादिभिर्न्यायदर्शनस्योपरि बहवो दोषाः प्रक्षिप्ताः । प्रक्षिप्तानां दोषाणां खण्डनाय न्यायशास्त्रे प्रमाणानां विशदविवेचनमभूदिति ज्ञायते । प्रमाणविवेचनक्रमे प्रामाण्यवादस्यापि विस्तरतो विवेचनमभूत् । प्रमाणविवेचनेन तस्य प्रामाण्यं वाऽप्रामाण्यमिति निश्चयं भवति । न्यायदर्शने प्रामाण्यवादस्य विवेचनं प्राचीनकाले तात्पर्यटीकाकारेणैव कृतमिति दृश्यते । वस्तुतः प्रामाण्यवाद इति संज्ञाऽर्वाचीनैरनन्तरकालिकैः कृता । सूत्रभाष्यवार्त्तिकग्रन्थेषु प्रामाण्यस्य स्पष्टोच्चारणं कुत्रापि नोपलभ्यते । गौतमादनन्तरकालिकैः सर्वैरप्याचार्यैः स्वप्रणीतग्रन्थेषु प्रमाणनिरूपणं विस्तारपूर्वकं हि कृतं दृश्यते, परन्तु तैः प्रामाण्यनिरूपणं किमर्थं न विहितमिति अनुसन्धेयः विषयः । जयन्तभट्टस्य प्रामाण्यविवेचनानन्तरं गङ्गेशोपाध्यायेन प्रामाण्यस्य निरूपणं पृथक्तयाऽभूत् । अनन्तरकालिका न्यायाचार्याः सर्वेऽपि प्रमाणपरिशीलने प्रामाण्यञ्च विस्तरशः प्रतिपादयामासुः । प्रामाण्यपरिशीलने आधुनिकानां नैयायिकानां वैशेषिकानाञ्च समानं मतम् । परन्तु प्रमाणानां सङ्ख्यास्वरूपादिनिर्धारणे ते परस्परं विवदन्ते ।

सर्वदर्शनसङ्ग्रहकारेण माधवाचार्येण प्रामाण्यवादविषयकानि चत्वारि मतानि प्रदर्शितानि सन्ति । प्रथमं तावत् साङ्ख्याचार्यैः प्रामाण्याप्रामाण्ययोर्द्वयोः स्वतत्वं स्वीक्रियते । तद्वैपरीत्यं नैयायिकैः प्रामाण्याप्रामाण्ययोः परत्वं स्वीक्रियते । तथैव बौद्धैः प्रामाण्यं परतोऽप्रामाण्यञ्च स्वत इत्युच्यते । मीमांसकैस्तद्विपरीतं प्रामाण्यं स्वतो गृह्यते (धर्मराजः,पृ. १९८) अप्रामाण्यञ्च परतो गृह्यते । वेदान्तपरिभाषाग्रन्थे च "व्यवहारे तु भाट्टनयः" इत्युक्तत्वात् प्रामाण्यं स्वतः ग्राह्यमित्युच्यते । वेदान्तपरिभाषाग्रन्थो न्यायशास्त्रस्य प्रभावेण रचितत्वात् स्वतन्त्रचिन्तनधारणया प्रणीतत्वाच्च तत्र अप्रामाण्यं परतः स्वीकृतं वर्तते । एवं मीमांसाश्लोकवार्त्तिककार आचार्यः

कुमारिलोऽपि ज्ञानस्य स्वतत्वं वा परतत्वमिति विषये चत्वारि मतानि प्रस्तौति । तस्य मीमांसादर्शनसम्बद्धः प्रामाण्यवाद अनन्तरं निरूप्यते ।

## समस्याकथनम्

दर्शनशास्त्रे प्रामाण्यवादः क्लिष्टो विषयः । तत्र प्रामाण्यनिरूपणमतीवक्लिष्टतरमिति सर्वै उच्यते । पुनश्च प्रामाण्यवादविषये दर्शनशास्त्रे मतैक्यं नास्ति । तत्र प्रामाण्यवादस्य निरूपणं सुबोधतया सरलभाषया सरलशैल्या च केनापि कृतं न प्रतीयते । यदुपलभ्यते तत् क्लिष्टभाषया शैल्या च प्रतिपादितं दृश्यते । अतः तत्र जिज्ञासूनां कृते प्रामाण्यवादबोधः क्लेशकरो भवतीति मन्ये । अस्मिन् लेखे इमे एव मुख्याः समस्या प्रस्तूयन्ते । तासु अधो मुख्यत्वेन निर्दिश्यन्ते –

क. न्यायदिशा प्रामाण्यवादः कः ?

ख) मीमांसासाङ्ख्ययोः प्रामाण्यवादः कथं खण्डचते ?

## उद्देश्यम्

उपरि समुपस्थापितानां समस्यानां समाधानमेवात्र मुख्यमुद्देश्यं वर्तते । तासां समास्यानां समाधानञ्चात्र क्रियते । अत उपरि स्थापितानां समस्यानां निराकरणं कृत्वा प्रामाण्यवादस्य विवेचनं मुख्यमुद्देश्यमस्ति । अत्र विशेषतोऽङ्कित उद्देश्ये निर्धारिते स्तः-

क. न्यायदिशा प्रामाण्यवादनिरूपणम् ।

ख) मीमांसासाङ्ख्ययोः प्रामाण्यवादस्य खण्डनम् ।

## शोधविधिः सीमाङ्कनञ्च

प्रामाण्यवादनिरूपणायात्र पुस्तकालयीयाध्ययनविधिः प्रयुक्तो वर्तते । तत्र पौरस्त्यदर्शनसम्बद्धा न्यायसाङ्ख्यमीमांसादर्शनसम्बद्धा ग्रन्थाः प्रामाण्यवादविषयकाः संस्कृतग्रन्थाः, द्वितीयकसामग्रीत्वेन अत्र गृह्यन्ते । तत्र प्रामण्यवादनिरूपितं मीमांसाश्लोकवार्त्तिकम्, तर्कभाषा च प्राथमिकसामग्रीत्वेन गृहीता वर्तते । तथैव पौरस्त्यदर्शनसम्बद्धैरनुसन्धातृभिः कृतानां शोधग्रन्थानामवलोकनं तेभ्यः सामग्रीग्रहणञ्चात्र विधीयते । लेखेऽस्मिन् न्यायदर्शनदिशा प्रामाण्यवादः चर्च्यते । अन्यत्र अन्यदर्शनदिशा अपि प्रामाण्यवादो विविक्तः प्राप्यते, परमत्र न्यायदर्शनमेवास्याधारः । न्यायाद् भिन्नेभ्यो दर्शनेभ्योऽविवेचनमस्य सीमा वर्तते ।

## पूर्वकार्यस्य समीक्षा

प्रथमं तावत् प्रामाण्यस्य निरूपणारम्भविषये विचारः क्रियते । वेदानां प्रामाण्यसिद्धौ मीमांसासूत्रकारेण प्रामाण्यस्य विचार आरब्ध इति शाबरभाष्यस्यावलोकनेन ज्ञायते । तदनन्तरं

श्लोकवार्त्तिकादावस्य विस्तृतं निरूपणं प्राप्यते । तस्मात् कारणादेव कतिपयैर्दार्शनिकैरुच्यते यद् - प्रामाण्यवादस्य प्रारम्भो वेदस्य प्रामाण्यनिर्धारणादभूदिति । तद्भावं गृह्णन् आचार्यः कणादो निगदति यद् 'तद्वचनाद् आम्नायस्य प्रामाण्यमिति' (कणादसूत्रम्, १।१।३) । इदं वैशेषिकदर्शनं पौरस्त्यदर्शनेषु प्राचीनतमं विद्यत इत्युत्तरवर्त्तिभिः तद्वचनग्रहणाद् ज्ञायते । परन्तु प्रामाण्यविषयिणी चर्चा केन दार्शनिकेन प्रारब्धेति अद्यावधि निश्चयेन वक्तुं न शक्यते । तथापि प्रथमतः प्रामाण्यस्य चर्चा मीमांसाशास्त्रे विहितेत्यत्र सर्वेषां दार्शनिकानां सहमतिः । न्यायमञ्जरीकारेण स्वीये न्यायमञ्जरीग्रन्थे प्रामाण्यविषयस्यारम्भो मीमांसात एव अभूदिति प्रतिपादितो वर्तते । जरन्नैयायिकेन जयन्तभट्टेन यावता विस्तरेण न्यायमञ्जरीग्रन्थे प्रामाण्यवादो निरुप्यते, तावता विस्तारेण अन्यैर्न कैरपि निरूपितो दृश्यते (जयन्तः, भा.-१, पृ. १५७) । अष्टमशताब्देरनन्तरं प्रणीतासु टीकासु न्यायसम्बद्धेषु मूलग्रन्थेषु च प्रामाण्यस्य निरूपणं प्राधान्येन विहितं दृश्यते । अस्मिन् विषये कतिपयैर्दार्शनिकैर्मौलिकग्रन्था अपि प्रणीताः सन्ति । तदनन्तरमस्मिन् सन्दर्भे नव्यन्यायाचार्यैः श्रीगङ्गेशोपाध्यायैः प्रामाण्यं क्लिष्टैः शब्दैः विविक्तम् । तत्त्वचिन्तामणिग्रन्थे तथा गदाधरस्य प्रामाण्यवादग्रन्थेऽपि प्रामाण्यस्य न केवलं सूक्ष्मचिन्तनं विहितमपि तु तत्र तर्कपूर्वकं तस्य गाम्भीर्यनिरूपणं सूपपादितम् ।

अत्र पूर्वकार्यसमीक्षायै न्यायवैशेषिकस्य परम्परापि अनुसन्धेया भवति । पौरस्त्यदर्शनजगति प्रसिद्धेन बौद्धदार्शनिकेन आर्यदेवेन विरचितस्य सत्-शास्त्रग्रन्थस्य टीकाकारेण 'चित्मना' इति नामधेयेन विदुषा वैशेषिकदर्शनस्य प्रवर्तक उलूक आसीदिति भणितं प्राप्यते । स सिद्धार्थगौतमाद् अष्टशतवर्षपूर्वमासीदित्यनुमीयते । तमेव सिद्धान्तमङ्गीकृत्य श्रीधराचार्येण न्यायकन्दलीग्रन्थो विरचितः । श्रीधराचार्यैः स्वकीयायां न्यायकन्दल्यां प्रामाण्यवादो विस्तरेण निरूपितो वर्तते । श्रीधराचार्यैः प्रथमं वेदानां परतः प्रामाण्यं प्रतिष्ठाप्य तदनन्तरं स्वतः प्रामाण्यमिति मीमांसामतस्योल्लेखो कृतो वर्तते । श्रीधराचार्येण प्रामाण्यं नाम "यथार्थपरिच्छेदकत्वं प्रामाण्यम्" इति न्यायकन्दलीग्रन्थे प्रतिपादितम् । तेन प्रामाण्यस्य स्वरूपम्, तस्योत्पत्तेः कारणम्, ज्ञप्तिञ्च सम्यग् निरूप्य स्वतः प्रामाण्यवादिनां मीमांसकानां मतं विस्तरतः समुल्लिख्य प्रमाणपूर्वकं परतः प्रामाण्यं निरूप्य स्वतः प्रामाण्यवादो निराकृतो वर्तते । (श्रीधरः, पृ. २१७-२२०) । वैशेषिकस्य विदुषः श्रीधराचार्यस्येदं मतं न्यायमतसम्मतञ्च वर्तते ।

तदुत्तरकालिकैः समये समयेऽस्मिन् विषये स्वीया धारणा प्रदिर्शिता । तेन च प्रामाण्यवादो जिज्ञासूनां दुर्ज्ञेयः क्लिष्टकरश्चाभूत् । न्यायभाष्ये वात्स्यायनेन प्रमाणशब्दस्य प्रयोजनं प्रतिपादितं परन्तु तस्य प्रमाणस्य प्रामाण्यं केन हेतुना वा कया प्रक्रियया भवतीति विषये किञ्चिदपि न प्रोक्तम् । आचार्यकेशवमिश्रेणाऽपि स्वकीयतर्कभाषाग्रन्थे प्रामाण्यविषये संक्षिप्ततया उल्लेखः कृतो वर्तते (झा, : १०९)। प्रसङ्गेऽस्मिन् प्रामाण्यग्रहः केन कथञ्च भवतीति प्रश्नमुत्थाप्य समाधानञ्च सुष्पष्टं निरूपितं वर्तते । तर्कभाषायां प्रतिपादितं प्रामाण्यं प्रामाण्यनिरूपणस्य दिग्दर्शनमात्रं वर्तते । तत्र प्रामाण्यविषे सुस्पष्टं सरलञ्च व्याख्यानं विहितम् । तादृशस्य प्रामाण्यस्य ऋजुविवेचनं तत्र विहितं न दृश्यते । आचार्यगङ्गेशोपाध्यायादुत्तरवर्त्तिभिर्नवीनैर्नैयायिकैः प्रामाण्यवादविषये विस्तरतो विवेचनं विहितमस्ति । विशेषतस्तत्र स्वतः प्रामाण्यवादे कतिपये दोषाः प्रदर्श्यन्ते । अन्त्ये- परतः प्रामाण्यवादस्यावश्यकत्वञ्च निरूप्यते । तादृशः प्रामाण्यवादः सुकरः सुबोध्यश्चास्तीति लेखेऽस्मिन् प्रदर्शितो वर्तते ।

## विषयविश्लेषणम्

### मीमांसादर्शनदृष्ट्या प्रामाण्यवादः

मीमांसामतस्य दूषणं तत्र शास्त्रेषु न्यायाचार्यैः क्रियते । न्यायाचार्येष्वपि न्यायमञ्जरीकारेण जयन्तभट्टेन प्रामाण्यवादस्य विवेचनं विस्तरेण कृतम् । अनेन मीमांसकानां स्वतः प्रामाण्यं गभीरशैल्या विवेचितं वर्तते । जयन्तभट्टेनात्र विस्तरशः सुबोधशैल्या च पूर्वपक्षरूपेण स्वतःप्रामाण्यं प्रस्तुत्य तस्य खण्डनं विहितं वर्तते । तस्य विषयप्रतिपादनं कुमारिलस्य श्लोकवार्तिकापेक्षया उत्कृष्टतरं प्रतीयते । प्रथमं तावत् मीमांसकानां स्वतःप्रामाण्यस्य विवेचनं कर्तव्यम् ।

मीमांसामते प्रामाण्य-शब्देन ज्ञानस्य याथार्थ्यं बुध्यते । मीमांसकैरुच्यते- प्रामाण्यं ज्ञानाभ्यन्तरे तिष्ठति । अतो ज्ञानप्रामाण्ययोः गुणगुणिभाव-सम्बन्धो वर्तत इति । तेषां मते ज्ञानं धर्मी (गुणी) अस्ति । तस्योपरि प्रामाण्यं (गुणः) तिष्ठति, तच्च प्रामाण्यं स्वतो ग्राह्यमिति । तेषामभिप्रायोऽयमस्ति यत्- येन कारणेन ज्ञानं गृह्यते तेनैव कारणेन तत्सम्बद्धस्य धर्मिणोऽपि ग्रहणं भवति । तस्माद् मीमांसामते- ज्ञानग्राहकाणि कारणानि, प्रामाण्यग्राहकाणि कारणानि च समानानि इत्येव मन्तव्यम् । फलतः येन साधनेन धर्मी गृह्यते तेनैव साधनेन तस्य धर्मोऽपि गृह्यते । समानसाधनगृहीतत्वात् स्वतो ग्राह्यत्वं सिद्ध्यतीति । नैयायिकोपरि मीमांसकैरुच्यते यत्- एकेन साधनेन ज्ञानं गृह्यते तदनन्तरञ्च अन्येनैव साधनेन तस्य प्रामाण्यञ्च गृह्यत इति तु न कदापि सम्भवति । ज्ञानं प्रामाण्यञ्च एकेनैव साधनेन गृह्यत इति तेषामभिप्रायः । ज्ञानस्य प्रामाण्यं ग्रहितुं

ज्ञानग्राहकातिरिक्तानपेक्षत्वं हि वस्तुतो स्वतः प्रामाण्यं वर्तत इति । (केशवमिश्रः, पृ. २५६-२८८) मीमांसामतानुसारं ज्ञाततताद्वारा अर्थापत्तिर्भवति । तया अर्थापत्या च ज्ञाने विद्यमानं प्रामाण्यमपि गृह्यते । तस्मात् प्रामाण्यग्राहकमर्थापत्यतिरिक्तं भिन्नं साधनं न गृह्यत इति । भाट्टमतानुसारेण ज्ञानस्य ग्रहणं अर्थापत्तिप्रमाणद्वारा भवति । अस्माभिर्यत्र तत्र पदार्था दृश्यन्ते श्रूयन्तेऽपि च तेषां पदार्थानां ग्रहणमन्यथानुपपत्तेः, यत्र उपपादकार्थः कल्प्यते तत्र अर्थापत्तिप्रमाणस्योपस्थितिर्भवति । तत्र च ज्ञाततारूपकार्यस्य ज्ञानरूपकारणं विना उपपत्तेरभावात् ज्ञाततान्यथानुपपत्तिप्रसूतार्थापत्तिद्वारा अर्थान्तरं कल्प्यते । यथा च इन्द्रियार्थसन्निकर्षजन्यं घटरूपज्ञानं भवति । तज्ज्ञानमपि अयं घटः इत्यात्मकं भवति । तादृशं अयं घटः इत्यात्मकं ज्ञानं तत्रैव घटे कस्यचिद् धर्मस्योत्पादनं करोति । तादृशो धर्मः ज्ञातता भवति । ज्ञाततताद्वारा मया घटो ज्ञातः इत्याद्यनुभवो जायते । एतदेव घटज्ञानस्य ज्ञानमस्ति । तस्याकारः अहं घटं जानामि इति भवति । ज्ञाततायारुत्पत्ति ज्ञानेनैव भवतीति मन्तव्यम् । वस्तुतो ज्ञाततायाः कारणं ज्ञानमस्ति । मीमांसकैः प्रतिपाद्यते यद् अर्थापत्तिद्वारा ज्ञानप्रामाण्ययोर्द्वयोः ग्रहणं भवतीति । तत्र मीमांसकाः तु प्रवृत्तिपूर्वमेव ज्ञानग्रहणं भवतीति मन्यन्ते । यदि प्रवृत्तिपूर्वं ज्ञानग्रहणं न भवति तर्हि कस्यापि पदार्थस्य विषये सन्देहोऽपि न जायेत । मया गृह्यमाणं ज्ञानं कीदृशम् ? यथार्थोऽयथार्थो वा इत्यात्मकं चिन्तनमपि तत्र न स्यात् यदि प्रवृत्तिपूर्वं ज्ञानं न गृह्यते चेत् । यथा सायङ्काले मार्गे दूरादेव केनापि पुरुषेण स्थाणुः दृष्टः । परन्तु दूरत्वाद् तत्र पुरुषं निश्चेतुं न शक्नोति अयं स्थाणुर्वा पुरुषो वेति । तस्य मनसि संशयो जायते मया गृहीतं स्थाणुविषकं ज्ञानं प्रामाण्यं वा अप्रामाण्यमिति । प्रामाण्यमप्रामाण्ये च ज्ञानस्य धर्मे स्तः । यदि पुरुषस्तत्र ज्ञानं न गृह्णाति तर्हि तज्ज्ञानविषये पुरुषस्य मनसि सन्देहोऽपि नोत्पद्यते । यतो हि धर्मीज्ञानानन्तरमेव धर्मस्य ज्ञानं भवतीति लोकव्यवहारेऽनुभवो वर्तते । यदि पुरुषेण स्थाणुसदृशः पदार्थो न दृष्टः स्यात् तर्हि तस्य पुरुषस्य मनसि सन्देहोऽपि न जायेत । अतः प्रवृत्तिपूर्वं सन्देहो भवति तेन एतन्निश्चयेन वक्तुं शक्यते प्रवृत्तिपूर्वं हि ज्ञानग्रहणमपि भवति । ज्ञानग्रहणेन सह ज्ञानस्य प्रामाण्यमपि निश्चीयते । तस्मात् प्रामाण्यं स्वतो भवतीति मन्तव्यम् (तर्कभाषा प्रामाण्यवादः) । मीमांसकैः प्रतिपाद्यते यत् प्रतिज्ञानं प्रामाण्यं स्वतो भवति । ज्ञानस्य कारणं प्रामाण्यस्यापि कारणं समानमेव । येन कारणेन कस्यापि वस्तुनो ज्ञानस्य ग्रहणं भवति । तेनैव कारणेन तस्य प्रामाण्यमपि सिद्ध्यतीति । मीमांसकातिरिक्तमद्वैतवेदान्तिनोऽपि ज्ञानस्य प्रामाणिकतासिद्ध्यर्थं अन्यज्ञानस्यापेक्षा न भवतीति मन्यन्ते ।

यथा रविः स्वप्रकाशद्वारा सर्वान् प्रकाश्य स्वयमपि प्रकाशितो भवति, तथैव ज्ञानं स्वेनैव ज्ञानेन सह स्वस्य प्रामाण्यमपि प्रदर्शयतीति। एतदेव वस्तुतः स्वतःप्रामाण्यवादः। तस्य दिङ्मात्रमुपरि प्रदर्शितम्।

**मीमांसामतखण्डनम्**

तर्कभाषाकारेण मीमांसामतं त्रिधा विभज्य खण्डितं दृश्यते। प्रथमं ज्ञातताधर्मस्योत्पत्तिरेव न सम्भवतीति प्रतिपाद्यते। तत्रैव ज्ञाततायारुपत्तिर्निराक्रियते। तदनन्तरं ज्ञातताद्वारा विषयस्य नियमनं न सम्भवतीति निरुप्यते। अन्त्ये च प्रामाण्यं स्वतो ग्राह्यत्वं भवितुमेव न शक्नोतीति प्रदर्श्यते। (केशवमिश्रः, पृ. २५६-२८८)। अत्रैव विचार्यते यथा- घटो विषयोऽस्ति। घटज्ञानञ्च विषयी भवति। अत्र विषयविषयीभावसिद्ध्यर्थं मीमांसकैर्ज्ञातता स्वीक्रियते। न्यायमते तु ज्ञातताद्वारा विषयविषयीभावो न सिद्ध्यति। अपितु विषयविषयीभावस्तु स्वाभाविकतया भवति। न्यायमते समस्तपदार्थानां विषयविषयीभावः सम्बन्धः स्वभाविक एव। यदि ज्ञाततामनुसृत्य विषयविषयीभावः सम्बन्धः स्वीक्रियते तर्हि तत्र दोषद्वयं भवितुं शक्नोति, यथा -

***प्रथमदोषः-*** यदि ज्ञाततामनुसृत्य विषयविषयीभावः स्वीक्रियते तदा अतीतानागतपदार्थानां ज्ञानं न स्यात्। यतो हि वर्तमानकालिकज्ञातताया आधारस्तु वर्तमानकालिकपदार्था एव भवन्ति। अतीतादिपदार्थानां वर्तमानकालेन सह सम्बन्धाभावात् तेषां सत्तैव न सम्भवति। अस्यामवस्थायां ज्ञानेनोत्पन्ना ज्ञातता अतीतादिपदार्थेषु कथं वर्तेत ? यदि विषयविषयीसम्बन्धस्य नियामकत्वेन ज्ञातता स्वीक्रियते तर्हि तदानीं अतीतादिपदार्थाः विषयत्वेन ग्रहितुं न शक्यन्ते। तस्माद् विषयस्य नियामकत्वेन ज्ञाततायाः स्वीकारस्तु अनुचितो दृश्यत इति।

***द्वितीयदोषः-*** अनवस्था वर्तत इति। अनवस्था कथं भवत्यत्र प्रस्तूयते। मीमांसादृष्ट्या ज्ञानस्य विषयत्वेन ज्ञाततया ग्रहणं तदा सम्भवति यदा ज्ञानेनोत्पन्ना ज्ञातता ज्ञाने विद्यमाना स्यात्। ज्ञाततायाः ज्ञानाय तद्भिन्ना अन्या ज्ञातता स्वीकर्तव्या भवति। तेन अस्यामवस्थायां प्रथमोत्पन्ना ज्ञातता एव विषयत्वेन गृह्यते। तथा च अस्य ज्ञाततारूपविषयस्योपपादनाय अन्या काचिद् द्वितीया ज्ञातता स्वीकर्तव्या भवति। पुनश्च इयं द्वितीया ज्ञाततापि ज्ञानविषयं करोति। तदनन्तरं तस्य ज्ञाततारूपविषयस्योपपादनाय अन्या तृतीया ज्ञातता स्वीकर्तव्या भवतीति। इयं ज्ञाततापरम्परा कुत्रापि विश्रामं न करोति। तेन च अनवस्थादोष उत्पद्यते। अनवस्थादोषाद् ज्ञातताया विषयनियामकत्वेन ग्रहितुं न शक्यते। अतो विषयनियामकत्वेन ज्ञातताया ग्रहणं न कर्तव्यम्। घटविषयस्य घटज्ञानस्य च विषयविषयीभावः स्वाभाविक एव। न्यायमते च ज्ञानविषयतातिरिक्तो

ज्ञाततारूपधर्मो न कदापि स्वीक्रियते । मीमांसकाः स्वतः प्रामाण्यं प्रतिपादनाय ज्ञाततां प्रमुखकारणं मन्यन्ते । ते तमेवानुसृत्य "ज्ञाततान्यथानुपपत्तिप्रसूता अर्थापत्तिः" इत्यादिना अर्थापत्तिना ज्ञानप्रामाण्ये च गृहीत्वा स्वतः प्रामाण्यं प्रतिष्ठापयन्ति । परन्तु नैयायिकाः प्रमुखकारणत्वेनोपपादितां ज्ञाततां सप्रमाणं निरासयन्तो तदाधारेण प्रतिपादितं अर्थापत्तिप्रमाणमपि स्वतः समाप्तिं कुर्वन्तीति । वस्तुतो विषयनियामकत्वस्य खण्डनात् तदाधारकत्वेन प्रतिपादितं स्वतः प्रामाण्यमपि खण्डितमेव । परन्तु मीमांसकाः प्रामाण्यं स्वतः वदन्ति । अप्रमाण्यञ्च परतः वदन्ति । तैरप्रामाण्यं परतः स्वीकृतं यद्, तदपि असमीचीनमेव। यथा विषयस्य यथार्थज्ञानेन ज्ञाने ज्ञातता जायते । तद्वद् अयथार्थज्ञानेनापि ज्ञातता उत्पद्येत । यथार्थज्ञानेन उत्पन्नज्ञातताद्वारा ज्ञानं प्रामाण्यञ्च गृह्येते तथैव अयथार्थज्ञानेनोत्पन्नज्ञातताद्वारा ज्ञानमप्रामाण्यञ्च गृहीतव्ये एव । यदि अप्रामाण्यं परतः स्वीक्रियते तर्हि प्रामाण्यमपि परतः स्वीकर्तव्यम् । परन्तु मीमासंकैः प्रामाण्यं स्वतः स्वीकृत्य अप्रामाण्यञ्च करणदोषजन्यत्वस्वीकरणात् परतः स्वीक्रियते । नैयायिकाश्च प्रामाण्याप्रामाण्ययोः समानावस्थां स्वीकृत्य द्वयोः परतो मन्तव्यमिति निरूपयन्ति ।

**न्यायदिशा प्रामाण्यसाफल्यविचारः**

न्यायभाष्यकारैर्न्यायभाष्ये उच्यते यत् प्रमाणैरर्थज्ञानं क्रियते, अर्थज्ञानादेव प्रवृत्तिसाफल्यं भवतीति । तेन प्रमाणस्य सप्रयोजनत्वं सिद्ध्यतीति (वात्स्यायनः पृ.२ ) । प्रमाणस्य सार्थकता यथार्थज्ञाने विद्यते । तथा जाते तद्विषयकी प्रवृत्तिः दृश्यते । प्रवृतिसाफल्यं हि प्रामाण्यम् । इदञ्च क्रमपूर्वकमेव भवतीति भाष्यकारस्य मतम् । अर्थप्राप्तिरूपफलस्योपलब्धिः सामर्थ्यं वर्तते । तदनन्तरं हि प्रमाणसाफल्यं सिद्ध्यति ।

**साङ्ख्यमते प्रामाण्यविचारः**

प्रामाण्यं स्वतो भवति, अप्रामाण्यमपि स्वत एव भवतीति साङ्ख्याः । विषयेऽस्मिन् साङ्ख्यैः उच्यते यद् असदो वस्तुन उत्पत्तेरभावात् तस्य सत्ता भवितुं न शक्नोति । अर्थाद् वस्तुतः सद्वस्तून्येव उद्भवन्ति, उद्भवनाच्च तेषां सत्ता भवितुं शक्नोति । अत्र यदि ज्ञाने प्रामाण्यं प्रागेव सद्वस्तुषु विद्यमानं न स्याद् तर्हि तन्न केनाप्युपायेन उत्पादयितुं शक्नोति । तद्वद् अप्रामाण्येऽपि ज्ञातव्यमिति । तदर्थं ज्ञाने प्रामाण्यमप्रामाण्यञ्च स्वतो भवत इति साङ्ख्याचार्यैः कथ्यते । तेषां मते वस्तूनां सत्ता पूर्वमेव विद्यमाना भवति । अर्थाद् यस्य वस्तुनः, ज्ञानस्य, धर्मस्य वा सत्ता पूर्वतः पदार्थादौ विद्यामाना न स्यात् तर्हि सा पश्चाद् तस्योपरि भवितुं न शक्नुयाद् । कथञ्चिद् अविद्यमानानां वस्तूनां सत्ता कदापि

भवितुं न शक्नोतीति । विद्यमानानामेव सत्ता भवतीति । तस्माद् ज्ञाने प्रामाण्यमप्रामाण्यञ्च पूर्वमेव भवतीति मन्तव्यम् ( वाचस्पतिमिश्रः पृ.८६ ) परन्तु साङ्ख्यशास्त्रे प्रमाणविषये तावान् उल्लेखो न दृश्यते ।

**परतः प्रामाण्यनिरूपणम्**

नैयायिकैः परतः प्रामाण्यं स्वीक्रियते । परतः प्रामाण्ये ज्ञानग्राहकसाधनानि प्रामाण्यग्राहकाणि साधनानि च पृथगेव सन्ति । ज्ञानग्राहकसाधनत्वेन न्यायदर्शने अनुव्यवसायो गृह्यते । एवञ्च प्रामाण्याप्रामाण्यबोधः प्रवृत्तेः साफल्यवैफलभ्यामनुमीयते । ज्ञानस्य ज्ञानं हि अनुव्यवसाय उच्यते । यथा – अयं घट इत्यत्र घटविषयकं ज्ञानं घटेनैव उत्पद्यते । अस्य ज्ञानस्य विषयो घटो वर्तते । अत्र प्रथमं ज्ञानं (घटस्य ज्ञानम्) व्यवसायात्मकमस्ति । एतज्ज्ञानानन्तरं घटज्ञानवानहम्, अथवा घटमहं जानामि इत्यात्मकं ज्ञानमुत्पद्यते । अत्र द्वितीयज्ञाने ज्ञानस्य विषयो घटो न भवति । ज्ञानस्य विषयस्तु अत्र घटज्ञानमस्ति । एतेन निश्चीयते यद् घटादिविषयकज्ञानस्य ज्ञानं अनुव्यवसायात्मकं भवति । अत्र च जिज्ञासुजनैः सन्देहोऽपि क्रियते- नैयायिकैः उक्तं यद् अयं घट इति ज्ञानेन अनुव्यवसायस्य उपपत्तिर्भवति । तद्वद् मीमांसामतेऽपि उक्तमस्ति अयं घट एतेनैव ज्ञानेन ज्ञातता उत्पद्यते । उभयोर्मतयोः समानेयं स्थितिः । तर्हि उभयोर्मतयोः कीदृशं पार्थक्यमिति चेत् ? अत्रोच्यते- तत्रास्ति पार्थक्यम् । मीमांसाशास्त्रे प्रतिपादिता ज्ञातता घटादिविषयकज्ञाने वर्तते । न्यायशास्त्रे प्रतिपादितमनुव्यवसायात्मकं ज्ञानं तु आत्मनि वर्तते न तु घटादिविषयेषु । अत्र ज्ञानग्राहकसामग्रीत्वेन अनुव्यवसाय उच्यते । अनुव्यवसायज्ञानं हि मानसप्रत्यक्षमस्ति । न्यायमते च ज्ञानस्य ग्रहणं मानसप्रत्यक्षद्वारा भवति । परन्तु ज्ञानस्य प्रामाण्यग्रहणं तु प्रवृत्तिसाफल्यत्वरूपानुमानेन भवति । अर्थप्राप्त्यर्थं त्यागार्थं वा कृतो यत्नः प्रवृत्तिरस्ति । इयं प्रवृत्तिः सफला विफला च भवति ।

कुत्रचित् समर्थप्रवृत्तिरप्युच्यते । समर्थप्रवृत्तिश्च सफला प्रवृत्तिरेव वर्तते । कश्चिद् जिज्ञासुजनः ज्ञानं गृह्णाति । पश्चात् तादृशं गृहीतज्ञानमाश्रित्य जिज्ञासुजनः तत्प्राप्तये प्रयतते । यदि तदा अर्थप्राप्तिस्तेन ज्ञानेन भवति तर्हि प्रवृत्तिः सफला इत्युच्यते । पूर्वज्ञातस्य पदार्थस्य प्राप्तिर्न भवति तर्हि तदा प्रवृत्तिर्विफला भवतीति मन्तव्या । सफलप्रवृत्या यथार्थज्ञानस्य प्रामाण्यमनुमीयते । विफलप्रवृत्या च अप्रामाण्यस्य च अनुमानं क्रियते । अनुव्यवसायात्मकज्ञानेन प्रमाया अप्रमायाश्च द्वयोर्ग्रहणं भवति । अतो नैयायिकैः प्रवृत्तिसाफल्यात् प्रवृत्तिवैफल्याच्च परतः प्रामाण्याप्रामाण्ये चानुमीयेते । न्यायवैशेषिकदर्शने ज्ञानं स्वतः प्रामाणिकं भवति अथ चाप्रामाणिकं भवतीति उपपादयितुं न शक्यते । ज्ञानस्य सत्यत्वं वा मिथ्यात्वञ्च बाह्यवस्तुना निश्चीयते । यथा सर्पस्य ज्ञानं सत्यं वा

असत्यं तस्य निर्धारणं प्रकाशनेत्रादिबाह्यपदार्थानां साहाय्येन भवति तथैव ज्ञानस्य प्रामाणिकता वा अप्रमाणिकता स्वभावतो भवितुं न शक्नोति । जयन्तो भट्टः कथयति यत्- प्रामाण्यं वा अप्रामाण्यं ज्ञानस्य विशेषो गुणः । तयोरुत्पत्तिः सामान्येन गुणेन न सम्भवति, विशेषगुणत्वाद् विशेषगुणेषु तयोरुत्पत्तिः सम्भवति । अस्माभिः सर्वत्र दृश्यते च इन्द्रियाणां संयोगो वस्तुषु यदा भवति तदा ज्ञानं जायते । प्रमात्मकं ज्ञानं वा अप्रमात्मकं ज्ञानं सर्वेषां ज्ञानानां उत्पत्तिर्भवति, ज्ञानोत्पत्तये कारणानि बहूनि भवितुमर्हन्ति । गुणदोषावपि तत्र ज्ञानोत्पत्तये कारणत्वेन परिगृह्येते । गुणदोषावनुसृत्य ज्ञानस्य प्रामाण्यं वा अप्रामाण्यञ्चात्र सिद्ध्यति । यदा ज्ञाने सामान्यकारणेन सह गुणरूपविशेषकारणमपि तिष्ठति तदा ज्ञानं प्रामाण्यं भवति । यदा ज्ञाने दोषो तिष्ठति तदा च ज्ञानमप्रामाण्यं भवति । यदा इन्द्रियाणि समीचीनानि भवन्ति, अङ्गानि च स्वस्था भवन्ति । तादृशैः स्वस्थसमीचीनादिगुणविशिष्टैर्गृहीतं ज्ञानमपि प्रामाणिकं भवति । मन्ददृष्ट्यादिगुणविशेषयुक्तैरङ्गैः गृहीतज्ञानमपि अप्रामाणिकं भवति । वस्तुतो गुणदोषादीनि बाह्यज्ञानकरणानि । बाह्यकरणैः सह गुणदोषौ विद्येते । अतः प्रामाण्यं अप्रामाण्यञ्च गुणदोषावनुसृत्यैव भवत इति नैयायिकैः प्रामाण्याप्रामाण्ये च परतः स्वीक्रियते (वाचस्पतिः, पृ. १६० -१७३) ।

## निष्कर्षः

वस्तुतो मया गृहीतं ज्ञानं वास्तविकं वर्तते न वा इति विचार एव प्रामाण्यनिरूपणम् । ज्ञानं संशयविपर्ययादिदोषरहितं वा दोषयुक्तमिति निश्चयः स्वतो भवति परतो वेति विचारो दर्शनशास्त्रेषु क्रियते । बौद्धा मीमांसका नैयायिकाश्च ज्ञानस्य प्रामाण्यं विशेषतो निरूपणं कुर्वन्ति । न्यायतर्कभाषाग्रन्थे च मीमांसकानां प्रामाण्यं स्वतो भवति अप्रामाण्यञ्च परतो भवतीति मतं समालोच्य न्यायमतं निरूपितं वर्तते । न्यायमञ्जरीकारेण तर्कभाषाकारेण च तत्र मीमासकानां स्वतः प्रामाण्यवादः प्रमाणपूर्वकं खण्डितः । सर्वेषां दर्शनानां सिद्धान्ते विविधता दृश्यते । सिद्धान्तभेदेन निरूपणप्रक्रियायां भेदो दृश्यते । यथा – नैयायिका वेदस्य पौरुषेयत्वं स्वीकुर्वन्ति । तदर्थं ते प्रामाण्यं परतः स्वीकुर्वन्ति तेभ्यस्तथा स्वीकरणमपरिहार्यं वर्तते । नैयायिकाः परतः प्रामाण्यद्वारैव वेदस्य पौरुषेयत्वं स्वीकुर्वन्ति । यतो हि तत्र वेदवाक्यजन्यशाब्दबोधप्रमा वेदार्थविषयकपुरुषस्य यथार्थज्ञानेन जायते । वेदज्ञपुरुषेण वेदोपदेशकृतत्वाद् वेदे पौरुषेयत्वञ्च समायाति । वेदज्ञपुरुषस्य प्रामाण्येन वेदस्यापि प्रामाण्यत्वं सिद्ध्यति । अतो वेदज्ञः पुरुषस्तदानीं ईश्वरातिरिक्तमन्यो न सिद्ध्यति । तथा च वेदस्य कर्ता सर्वज्ञः परमेश्वर एव स्वीकार्यो भवति । तेन चानन्तरं परतः प्रामाण्यमेव संस्थापितो

भवति । तथा च मीमांसका वेदस्यापौरुषेयत्वं स्वीकुर्वन्ति । वेदस्यापौरुषेयत्वं प्रतिष्ठापनाय वेदवक्तुरभावात् ते स्वतः प्रामाण्यं स्वीकुर्वन्ति । अयमेव नैयायिकमीमांसकयोर्भेदः । विशेषतया स्वसिद्धान्तव्यवहारेण विवेचनं क्रियते तर्हि तत्र स्वतः भवति प्रामाण्यं वा परतो भवतीति एकैकं निश्चित्य वक्तव्यं भवति । अतो मूलसिद्धान्तानुरोधेन निरूपणप्रक्रियायां स्थूलदृष्ट्या भेदो दृश्यते सर्वेषु दर्शनसम्प्रदायेषु । तथा सति न्यायसम्मतः परतः प्रामाण्यवाद एव गरीयान् भवति । वस्तुतः दर्शनशास्त्राणामुपरि पारमार्थिकी दृष्टिः स्थाप्यते तर्हि समस्या न जायते । पारमार्थिकी दृष्टिरेव तत्वप्रतिपादिका दृष्टिरस्ति । तत्वञ्च भाष्यकारेणोक्तं वर्तते यत् - 'सत् सदिति गृह्यमाणं यथाभूतमविपरीतं ज्ञानमेव तत्वं भवति' (वात्स्यायनः, पृ.३) । तादृशतत्वज्ञानाद् निःश्रेयः प्राप्यते । प्रामाण्यस्य चरमप्रयोजनमपि तदेव निःश्रेयः । निःश्रेयः प्राप्त्यर्थं सर्वैरपि दार्शनिकैरुपाया वर्णिताः । अतः सर्वेषां दर्शनशास्त्राणां मुख्यं लक्ष्यं तावत् समानमेव दृश्यते । अतो लोकव्यवहारोपयोगी परतः प्रामाण्यवाद एव समुचितो भवतीति निष्कर्षः । अतो मीमांसादिमतापेक्षया न्यायवैशेषिकयोर्मतमेवोचितमित्यवधेयम् ।

## सन्दर्भसामग्रीसूची


आचार्यः, श्रीधरः (ई.१८९५ ) *न्यायकन्दली,* संस्कृत सीरिज ।

गौतमः (२०५७) *न्यायदर्शनम्,* (वात्स्यायनभाष्यसहितम्, सम्पादकः नारायणमिश्र) चौखम्बा संस्कृतसंस्थानम् ।

गौड, शशिबाला (२००४) *दर्शनशास्त्रस्येतिहासः,* चौखम्वा सुरभारती ।

भट्टः, कुमारिलः (ई.१९४० ) *श्लोकवार्तिकम्,* विश्वविद्यालयप्रकाशनम् ।

भट्टः, जयन्तः (ई.१९३६) न्यायमञ्जरी, चौखम्बाप्रकाशनम् ।

माधवाचार्यः, (ई.१९६६) *सर्वदर्शनसंग्रहः* (सम्पादकः उमाशंकरशर्मा) चौखम्बाविद्याभवनम् ।

मिश्रः, केशवः (२००३) तर्कभाषा ( रुद्रधर झा), चौखम्बा संस्कृत सिरिज ।

मिश्रः, केशवः **(२०१७) तर्कभाषा (आचार्य सुरेन्द्रदेव शास्त्री), चौखम्बा विद्याभवन ।**

**मिश्र, वाचस्पतिः, (ई. २००४) सांख्यतत्वकौमुदी, चौखम्बा सुरभारती प्रकाशन**

विजल्वान, चक्रधर (ई.१९९८) *भारतीय न्यायशास्त्र* (द्वितीय संस्करण), उत्तरप्रदेश हिन्दी संस्थान ।

शर्मा, राममूर्ति (ई.१९९८) *न्यायवैशेषिक एक चिन्तन,* राष्ट्रिय संस्कृतसंस्थान ।

शर्मा, व्रजनारायण (ई.१९७३) *भारतीय दर्शन में अनुमान,* मध्यप्रदेश हिन्दीग्रन्थ अकादमी ।